| लग्नाः | दिनभुक्तम् । | | मासभुक्तम् । | |
|---|---|---|---|---|
| यथा | पलम् । | विपलम् । | दण्डः । | पलम् । |
| ७ तुला । | १० । | ५८ ॥ | ५ । | २९ ॥ |
| ८ वृश्चिकः । | ११ । | २२ ॥ | ५ । | ४१ ॥ |
| ९ धनुः । | ११ । | २० ॥ | ५ । | ४० ॥ |
| १० मकरः । | १० । | १२ ॥ | ५ । | ६ ॥ |
| ११ कुम्भः । | ८ । | ३४ ॥ | ४ । | १७ ॥ |
| १२ मीनः । | ७ । | ३४ ॥ | ३ । | ४७ ॥ |

तत्र स्वदेशाधुनिकलग्नमानम् ।

| लग्नाः | दिनभुक्तम् । | | मासभुक्तम् । | |
|---|---|---|---|---|
| यथा | पलम् । | विपलम् । | दण्डः । | पलम् । |
| १ मेषः । | ८ । | १२ ॥ | ४ । | ६ । |
| २ वृषः । | ९ । | ३६ ॥ | ४ । | ४८ ॥ |
| ३ मिथुनम् । | १० । | ५४ ॥ | ५ । | २७ ॥ |
| ४ कर्कटः । | ११ । | २० ॥ | ५ । | ४० ॥ |
| ५ सिंहः । | ११ । | ८ ॥ | ५ । | ३४ ॥ |
| ६ कन्या । | १० । | ५८ ॥ | ५ । | २९ ॥ |
| ७ तुला । | ११ । | १२ ॥ | ५ । | ३६ ॥ |
| ८ वृश्चिकः । | ११ । | २२ ॥ | ५ । | ४१ ॥ |
| ९ धनुः । | १० । | ३८ ॥ | ५ । | १९ ॥ |
| १० मकरः । | ९ । | १० ॥ | ४ । | ३५ ॥ |
| ११ कुम्भः । | ७ । | ५६ ॥ | ३ । | ५८ ॥ |
| १२ मीनः । | ७ । | ३४ ॥ | ३ । | ४७ ॥ |

अथ जन्मकालीनलग्नस्थग्रहसूचितफलम् ।
"लग्ने सूर्य्येऽचिरोगी शशिनि बलयुतो
रूपवान् वित्तयुक्तो
भौमे चण्डः सुवाग्मी शशधरतनये सर्व्व-
शास्त्रार्थवेत्ता ।
जीवे दाता पवित्रः सुकविरथ गते भार्गवे
मण्डलेशः
सौरौ कण्डूतिगात्रस्तमसि च नियतं वर्षितो
धर्म्महीनः ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
अपि च ।
हरिरुवाच ।
"उदयन्तु समारभ्य राशौ भानुः स्थितो हर ।
स्वराश्यादौ व्रजेदह्नि षड्भिः षड्भिस्तथा
निशाम् ॥
मीने मेषे च पञ्च स्युश्चतस्रो वृषकुम्भयोः ।
मकरे मिथुने तिस्रः पञ्च चापे च कर्कटे ॥
सिंहे च वृश्चिके षट् च सप्त कन्या तुले तथा ।
एता लग्नप्रमाणेन घटिकाः परिकीर्त्तिताः ॥
शरपूर्व्वावशानेशुरसाब्धीब्धिसागराः ।
खण्डोदया हि है वस्तुं लग्ना मेषादयोऽथवा ॥
मेषलग्ने भवेद्वन्ध्या वृषे भवति कामिनी ।
मिथुने सुभगा कन्या वेश्या भवति कर्कटे ॥
सिंहे चैवाल्पपुत्रा च कन्यायां रूपसंयुता ।
तुलायां रूपमैश्वर्य्यं वृश्चिके कर्कशा भवेत् ॥
सौभाग्यं धनुषि स्याच्च मकरे नीचगामिनी ।
कुम्भे चैवाल्पपुत्रा स्यान्मीने वैराग्यसंयुता ॥
तुला कर्कटको मेषो मकरश्चैव राशयः ।
चरकार्य्याणि कुर्य्याच्च स्थिरकार्य्याणि चैव हि ॥
पञ्चाननो वृषः कुम्भो वृश्चिकः स्युः स्थिराणि हि ।
कन्या धनुश्च मीनश्च मिथुनं द्विस्वभावतः ॥
द्विस्वभावानि कर्म्माणि कुर्य्यादेषु विचक्षणः ।
यात्रा चरेण कर्त्तव्या प्रवेशश्च स्थिरेण तु ।
देवस्थापनवैवाह्यं द्विस्वभावेन कारयेत् ॥"
इति गारुडे ६२ अध्यायः ॥

लग्नः, पुं, (लग् + क्तः । निपातनात् साधुः । यद्वा, लस्ज + क्तः । "ओ लस्जी । लग्नः लग्नवान् । लस्जेरीदनुबन्धबलादिड्भावे नत्वं स्यात् ।" इति क्तषष्ठे दुर्गसिंहः । ) स्तुतिपाठकः ॥ तत्पर्य्यायः । प्रातर्गेयः २ स्तुतिव्रतः ३ । इति त्रिकाण्डशेषः ॥ सूतः ४ । इति जटाधरः ॥

लग्नः, त्रि, ( लस्ज + क्तप्रत्ययेन साधुः । ) सक्तः । लज्जितः । इति मेदिनी ॥

लग्नकः, पुं, ( लग्न एव । स्वार्थे कन् । ) प्रतिभूः । इत्यमरः ॥ हे लागा इति जामिन इति च ख्याते । तत्कार्य्ये लग्नकः । ओ लस्जी व्रीडे क्तः । स्वार्थे कन् । प्रतिनिधिर्भवति प्रतिभूः क्विप् । इति तट्टीकायां भरतः ॥

लग्निका, स्त्री, नग्निका । इत्यमरटीका ॥

लघ, इ शोषे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । ) इ, लङ्घते । शोष इह अल्पीकरणम् ।
'यं व्याधिरतिदीप्ताङ्गं कदाचित्तु न लङ्घति ॥'
इति हलायुधः ॥
गतावप्यन्ये । अन्ये चालङ्घिषुः शैलान् । इति दुर्गादासः ॥

लघ, इ क त्विषि । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-अक०-सेट् । ) इ क, लङ्घयति । त्विषि दीप्तौ । इति दुर्गादासः ॥

लघ, इ ङ अशुग्गत्योः । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-अक०-सक०च-सेट् । ) इ, लङ्घते । ङ, लङ्घते । अशुक् भोजनाभावः । तथा च ।
'ये गुणा लङ्घने प्रोक्तास्ते गुणा लघुभोजने ॥'
इति वैद्यकम् ॥
लङ्घने उपवासे इत्यर्थः । इति दुर्गादासः ॥

लघट्, पुं, ( लङ्घते मध्यस्थानमस्पृष्ट्वोत्तरस्थाने पतति प्लुतं इतस्ततो गच्छतीति वा । लघि + "लङ्घेर्नलोपश्च ।" उणा०१।१३४। इति अटिः । नलोपश्च धातोः । ) वायुः । इत्युणादिकोषः ॥

लघटिः, पुं, ( लघ गतौ + अटिः । इदभावः । ) वायुः । इत्युणादिकोषः ॥

लघिमा, [न्] पुं, ( लघोर्भावः । लघु + "पृथ्वादिभ्य इमनिज्वा ।" ५ । १ । १२२ । इति इमनिच् । ) लघुत्वम् । ( यथा, रघुः । १३ । ३७ ।
"शात्वा हविर्गन्धि रजोविमुक्तः
समश्नुते मे लघिमानमात्मा ॥")
तत्तु शिवस्याष्टैश्वर्य्यान्तर्गत ऐश्वर्य्यविशेषः । यथा,
"लघिमा वशितेशित्वं प्राकाम्यं महिमाणिमा ।
यत्र कामावसायित्वं प्राप्तिरैश्वर्य्यमष्टधा ॥"
इति हेमचन्द्रः ॥
(अबहुमतत्वम् । ह्रस्वत्वम् । यथा, आर्य्यासप्तशत्याम् । ६० ।
"अग्रे लघिमा पश्चात् महतापि विधीयते नहि
महिम्ना ।
वामन इति त्रिविक्रममभिदधति दशावतार-
विदः ॥" )

लघिष्ठः, त्रि, अयमनयोरेषां वा अतिशयेन लघुः इत्यर्थे इष्ठप्रत्ययेन निष्पन्नः । अतिशयलघुत्वयुक्तः । इति व्याकरणम् ॥ ( यथा, विदग्धमुखमण्डने ।
"भविन्नी रम्भोरु त्रिदशवदनग्लानिरधुना
स रामोऽपि स्याता न युधि पुरतो लक्ष्मणयुतः ।
गमिष्यत्येवोच्चैर्विपदमधुना वानरचमू-
र्लघिष्ठेदं षष्ठाक्षरपरविलोपात् पठ पुनः ॥"
सीतारावणयोरुक्तिप्रत्युक्तिरियम् । सप्तमाक्षर-लोपे त्विदं वाक्यम् । यथा । "दशवदनग्लानिः ।"
"स्याता युधि ।" "उच्चैः पदम् ॥" )

लघीयान् [ स् ] त्रि, अयमनयोरेषां वा अतिशयेन लघुः इत्यर्थे ईयसुप्रत्ययेन निष्पन्नः । अतिशयलघुत्वयुक्तः । इति व्याकरणम् ॥ ( यथा, महाभारते । २ । ६३ । १४ ।
"न वै सन्दर्हिं पालयते लघीयान्
यत्त्वां समानेष्यति राजपुत्त्रि ! ॥")

लघु, क्ली, ( लङ्घते अनेनेति । लघि + "लङ्घिवंह्योर्नलोपश्च ।" उणा० १ । ३० । इति कुः । धातोर्नलोपश्च । ) शीघ्रम् । इत्यमरः ॥ ( यथा, रामायणे । २ । ४६ । २१ ।
"यावदेव तु संसुप्तास्तावदेव वयं लघु ।
रथमारुह्य गच्छामः पन्थानमकुतोभयम् ॥" )
कृष्णागुरु । इति मेदिनी । घे, ५ ॥ लामज्जकम् । इति राजनिर्घण्टः ॥ ( अस्य पर्य्यायो यथा,—
"लामज्जकं सुनालं स्यादमृणालं लयं लघुः ।
इष्टकापथकं सेव्यं नलदञ्चावदातकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
हस्ताश्विनीपुष्यनक्षत्राणि । यथा, वृहत्संहितायाम् । ९८ । ९ ।
"लघु हस्ताश्विनपुष्याः
पण्यरतिज्ञानभूषणकलासु ।
शिल्पौषधयानादिषु
सिद्धिकराणि प्रदिष्टानि ॥"
कालपरिमाणविशेषः । यथा, भागवते । ३ । ११ । ७ ।
"चषान् पञ्च विदुः काष्ठां लघुता दश पञ्च च ।
लघूनि वै समाम्नाता दश पञ्च च नाडिकाः ॥"
पुं, प्राणायामविशेषः । यथा, मार्कण्डेये । ३९ । १३—१४ ।
"लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदलर्क शृणुष्व मे ॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः ।
त्रिगुणाभिस्तु मात्राभिरुत्तमः परिकीर्त्तितः ॥")

लघुः, स्त्री, पृक्का नाम औषधिः । इति मेदिनी । घे, ५ ॥ ( तथास्याः पर्य्यायः ।